vyoma-saṃskṛta-pāṭhaśālā

॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥

Learn Sanskrit From Home, Teach Sanskrit From Home.

Srimad-Bhagavadgeetha & Sanskrit

|| *Dharmakshetre kurukshetre* ||

Current Index : Chapter 1 shloka 1 : 15th Nov 2011

Vyoma Samskrta Paatashaala is an e-learning initiative of Vyoma Linguistic Labs Foundation – which is a non-profit section-25 linguistic technology company

http://www.sanskritfromhome.in/

http://www.vyomalabs.in/

vyóma

॥ वाचं धेनुमुपासीत ॥

vyoma-saṃskṛta-pāṭhaśālā
॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥

ध्यान श्लोका:

गुरुरेव गतिर्गुरुमेव भजे गुरुणैव सहास्मि नमो गुरवे ।
न गुरोः परमं शिशुरस्मि गुरोः मतिरस्ति गुरौ मम पाहि गुरो ॥

पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम् ।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायनीं
अम्ब **त्वामनुसन्दधामि** भगवद्गीते भवद्वेषिणीम् ॥

नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥

Recap of previous class

1. Why Geetha –
   - Vedas – Geetha link
   - Greatness of geetha – from scriptures
   - Greatness of geetha – from experiences of famous personalities

2. Geetha Vs Modern management books – No sequel required !

3. What is Geetha – Basic data

4. Anubandha Chatushtayam –
   - विषय:
   - प्रयोजनम्
   - अधिकारी
   - सम्बन्ध:

5. How to study Sreemadbhagavadgeetha

Chapter I, shloka 1

Shloka

(in devanagari)

धृतराष्ट्र उवाच
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ॥
मामकाः पाण्डावाश्चैव किमकुर्वत सञ्जय ।। १ ॥

(in English)

dharmakṣētrē kurukṣētrē samavētā yuyutsavaḥ |
māmakāḥ pāṇḍāvāścaiva kimakurvata sañjaya ||

Index Ref

1st chapter, 1 of 47

पदच्छेदः

धर्मक्षेत्रे, कुरुक्षेत्रे ,समवेताः, युयुत्सवः।
मामकाः, पाण्डवाः च,एव ,किम् अकुर्वत,सञ्जय ॥

Chapter I, shloka 1 …contd

अन्वयार्थ:

(Prose Order with meaning & introduction to the word)

(भोः) सञ्जय	हे सञ्जय	O Sanjaya	अ. पुं. सम्बो. ए.
धर्मक्षेत्रे	धर्मप्रधानक्षेत्रे	on the centre of religious activity	अ. नपुं. स. ए.
कुरुक्षेत्रे	कुरुक्षेत्राख्ये प्रदेशे	in Kuruksetra	अ. नपुं. स. ए.
समवेता:	सम्युक्ता:	assembled	अ. पुं. प्र. ब.
युयुत्सवः	योद्धुम् इच्छव:	desirous to fight	उ. पुं. प्र. ब.
मामकाः	मदीयाः	my people	अ. पुं. प्र. ब.
पाण्डवाः च	पाण्डुपुत्रा: च	and the Pandavas	अ. पुं. प्र. ब. / अव्ययम्
एव	हि	indeed	अव्ययम्
किम् अकुर्वत	किं कृतवन्त:	what did do.	म. सर्व. नपुं. द्वि. ए / कृ - आत्म. कर्तरि लङ् प्रप. बहु.

General format of Prose order

Simple sentences

कर्तृपदम्	कर्मपदम्	क्रियापदम्
प्रथमा or तृतीया	द्वितीया	लकार based
Doer of work	Object (what, whom)	Action / verb

A bit advanced

विषेशणम्	विषेशणम्	Other words
Same vibhakti as कर्तृपदम्	Same vibhakti as कर्मपदम्	To be placed as per the vibhakthi and meaning
Any word describing doer	Any word describing object	

Chapter I, shloka 1 ...contd

अर्थ: संजय ! धर्मक्षेत्रे कुरुक्षेत्रे समेवेताः युयुत्सवः मामकाः पाण्डवाः च किम् अकुर्वत ?

Meaning Tell me, O Sanjaya ! Assembled on Kurukshetra, the centre of religious activity, desirous to fight, what indeed did my people and the Pandavas do ?

तात्पर्यं 'हे सञ्जय ! मत्पुत्रा: पाण्डुपत्राश्च युद्धं कर्तुम् उत्सुकाः सन्तः धर्मक्षेत्रे कुरुक्षेत्रे सम्मिल्य किम् अकुर्वन् ? ' इति धृतराष्ट्र संजयम् अपृच्छत् ।

व्याकरणम्

सन्धि:	समवेता युयुत्सवः	समवेताः	+ युयुत्सवः	विसर्गसन्धिः (लोपः)
	पाण्डवाश्चैव	पाण्डवाः	+ च	विसर्गसन्धिः (सकारः) श्चुत्वसन्धि
		पाण्डवाश्च	+ एव	वृद्धिसन्धिः
समास:	धर्मक्षेत्रे -	धर्मस्य क्षेत्रम् धर्मक्षेत्रम्, तस्मिन् - षष्ठीतत्पुरुषः ।		
	कुरुक्षेत्रे -	करुणां क्षेत्रम् कुरुक्षेत्रम्, तस्मिन् - षष्टीतत्पुरुषः ।		
कृदन्त:	समवेताः -	सम् + अव् +इण् + क्त	(कर्तरि)	
	युयुत्सवः -	युध् + सन् (इच्छार्थे)	+ उ (कर्तरि)	
तद्धितन्त:	मामकाः -	अस्मद् (ममकादेशः)	+ अण् । मम इमे इति मामकाः	
	पाण्डवाः -	पाण्डु	+ अण् (अपत्यार्थे) । पाण्डोः अपत्यानि पुमांसः इति पाण्डवाः ।	

Chapter I, shloka 1 …contd

विशेषांशा: / Special Notes

१ धर्मक्षेत्रे कुरुक्षेत्रे - inspirational story

२ where धर्म - there जय

३ मामकाः - तावकाः

४ धर्मक्षेत्रे - change of mind ?

के - के धृतराष्ट्र:

(who is who) सञ्जय:

vyoma-saṃskṛta-pāṭhaśālā

॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥

Learn Sanskrit From Home, Teach Sanskrit From Home.

धन्यवादाः

For any queries/ feedback please feel free to email us at

Vyoma Linguistic Labs Foundation

A non-profit section-25 linguistic technology company

Ph: 09686674545 (Between 10 AM and 5 PM on weekdays)

Email: sanskritfromhome@vyomalabs.in

http://www.sanskritfromhome.in/

http://www.vyomalabs.in/

vyóma

॥ वाचं धेनुमुपासीत ॥